Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

संस्कृतप्रचारपरिषद्ग्रन्थमाला – 1

गीतसंस्कृतम्

प्रथमभागः

B-20

C. R. Nagaraja

प्रकाशिका

संस्कृतप्रचारपरिषत्

तिरुपति

1984

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रथमम् प्रकाशनम् :
रक्ताक्षि कार्तीकपौर्णमासी
प्रतय: 3000

First Edition :
November 1984
Copies : 3000

प्रतीनां कृते —

1. संस्कृतप्रचारपरिषत्
5-5-313B1,
सरोजिनीदेवी ले-औट्,
तिरुपति - 517 507

2, हिन्दुसेवाप्रतिष्ठानम्
संस्कृतविभाग:
73/2 अक्षरम्
रङ्गाराव् मार्ग:
शङ्करपुरम्,
बेङ्गलूरु - 560 004

For Copies —

Samskrita prachara parishad
5-5-313B1,
Sarojinidevi Lay-out,
Tirupati - 517 507

Hindu Seva pratisthanam
Samskrita vibhag
73/2 Aksharam,
Ranga Rao Road,
Sankarapuram,
Bangalore - 560 004

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

समर्पितम्

नेल्लूरुमण्डलान्तर्गतमिनगल्लुग्रामाभिजनानां
दिवङ्गतानां श्रीमद्भां
आल्तूरु रामिरेड्डि महोदयानां
दिव्यसंस्मरणे

★

DEDICATED TO
Late Sri **ALTURU RAMI REDDY**
of Minagallu Village
Kovur Taluk, Nellore District.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विज्ञापनम्

महानयं प्रमोदस्य विषयः यत्सरलसंस्कृतप्रचाराय उद्युक्तेयं परिषत् स्वीयं प्रथमं प्रकाशनं "**गीतसंस्कृतम्**" संस्कृतप्रेमिणां करकमलेषु समर्पयति। अस्य गीतसंस्कृतस्य प्रकाशनाय प्रोत्साहः, सङ्कलितानां संस्कृतानां गीतानां प्रेषणादिना हिन्दुसेवाप्रतिष्ठानस्य संस्कृतविभागेन दत्तः, यदर्थं परिषद् तस्मै विभागाय स्वीयं कार्तज्ञं प्रकाशयति। ये च गीतानां लेखकाः स्वस्वगीतानि प्रकाशयितुम् अङ्गीकृतवन्तः तेभ्योऽपि कृतज्ञेयं परिषद्।

"धनमूलमिदं जगत्" इति हि सूक्तिः। अतः सत्यपि पूर्वोक्ते प्रोत्साहे यद्विना प्रकाशनम् अशक्यं तस्य अपेक्षितस्य सर्वस्यापि धनस्य दातृभ्यः श्रीमतां कीर्तिशेषाणाम् आल्तूरु रामिरेड्डिमहोदयानां कुटुम्बसभ्येभ्यः सप्रश्रयं सधन्यवादं कार्तज्ञं निवेदयति। परिषद्बन्धुभ्यः Sri A. A P. SASTRI (Manager, Syndicate Bank, Tirupati) महोदयेभ्योऽपि हार्दिकाः धन्यवादाः।

काले सुन्दरं मुद्रितवद्भ्यः **Vijaya Press** चालकेभ्यः कर्मचारिभ्यः, तथा अन्येभ्यश्च सर्वेभ्यः हार्दाः धन्यवादाः।

8–11–'84

परिषत्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1. पठत संस्कृतम्

रेवतिराग: आदिताल:

पठत संस्कृतम्, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ।। पठत

ज्ञानवैभवं वेदवाङ्मयं
लसति भवभयापहारि यत्र मुनिभिरार्जितम् ।
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाण-मुख्यकविभिः ।। पठत

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम् ।
नैव यद्विना जना विजानते
भारतीयसंस्कृतिं सनातनाभिधां वराम् ।। पठत

जयतु संस्कृतम्, संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम् ।
जयतु संस्कृतम्, जयतु मनुकुलम्
जयतु जयतु संस्कृतम्, जयतु जयतु मनुकुलम् ।। पठत

श्री मञ्जुनाथशर्मा

★

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2. लोकहितं मम करणीयम्

हिन्दोलराग: आदिताल:

मनसा सततं स्मरणीयम्
वचसा सततं वदनीयम्
लोकहितं मम करणीयम् ॥ लोकहितं
न भोगभवने रमणीयम्
न च सुखशयने शयनीयम् ।
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम् ॥ मनसा
न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम् ।
कार्यक्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम् ॥ मनसा
दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम् ।
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम् ॥ मनसा
गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम् ॥ मनसा

डा. श्रीधर भास्कर वर्णेकर:

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

3. नैव क्लिष्टा न च कठिना

यमन् कल्याणीरागः आदितालः

सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया ।
अमृतवाणी सस्कृतभाषा
नैव क्लिष्टा न च कठिना ।। नैव क्लिटा
कविकोकिलवाल्मीकिविरचिता
रामायणरमणीयकथा ।
अतीव सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना ।। सुरस
व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा ।
कौरवपाण्डवसङ्गरमथिता
नैव क्लिष्टा न च कठिना ।। सुरस
कुरुक्षेत्रसमराङ्गणगीता
विश्ववन्दिता भगवद्गीता ।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना ।। सुरस
कविकुलगुरुनवरसोन्मेषजा
ऋतु-रघु-कुमारकविता ।
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिना ।। सुरस

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

4. विस्मृतभेदाः सन्तः

बेहाक्रागः चतुरस्रैकतालः

विस्मृतभेदाः सन्तो
निर्मलभावापन्नाः
एकीभावं हृदयारूढं सततं कुर्वन्तु
भो भो सततं कुर्वन्तु ॥ विस्मृत

पूर्वजमुनिजन-कविजन-वाञ्छा सर्वेषामैक्यम्
सुखिनः सर्वे सन्त्विति गानं तेषां बहुहृद्यम् ।
भाषाधनमतजातिविभेदः हृदये मा भवतु
दुःखितदीनजनानुन्नेतुं हस्ता प्रसरन्तु
भो भो हस्ता प्रसरन्तु ॥ विस्मृत

गङ्गातुङ्गाकावेरीजलमस्माकं मत्वा
कृतसङ्कल्पाः कार्यं कर्तुम् आलस्यं हित्वा ।
सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् आयान्तु
प्रवहतु कामं स्वेदस्रोतः, धैर्यं मा जहतु
भो भो धैर्यं मा जहतु ॥ विस्मृत

घर्षणलुण्ठनवञ्चनहननम् प्रलयं संयातु
स्नेहस्रोतः प्रवहतु भ्रातुर्भावो हृदि लसतु ।
अनिलः सलिलम् अनलः सर्वं सर्वेषामेकम्
प्रवहति रक्तमभक्तं मातुः भेदो मा भवतु
भो भो भेदो मा भवतु । विस्मृत

श्री जि महाबलेश्वरभट्टः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

5. सुन्दरसुरभाषा

शिवरञ्जनीरागः आदितालः

मुनिवरविकसित–कविवरविलसित–
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा ।
अयि मातस्तव पोषणक्षमता
मम वचनातीता सुन्दरसुरभाषा ।। मुनिवर

वेदव्यासवाल्मीकिमुनीनाम्
कालिदास-बाणादिकवीनाम् ।
पौराणिकसामान्यजनानाम्
जीवनस्य आशा, सुन्दरसुरभाषा ।। मुनिवर

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे ।
गतिमतिप्रेरककाव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा ।। मुनिवर

नवरसरुचिरालंकृतिधारा
वेदविषयवेदान्तविचारा ।
वैद्यव्योमशास्त्रादिविहारा
विजयते धरायां, सुन्दरसुरभाषा ।। मुनिवर

श्री नारायणभट्टः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

6. वयं हिन्दुसञ्जाताः सर्वे

सिन्धुभैरवीरागः खण्डैकतालः

वयं हिन्दुसञ्जाताः सर्वे, अस्माकं पुण्यम्
पावनराष्ट्रं, भावय श्रेष्टम् ।। वयं हिन्दु

जननमपि दुर्लभमत्र
दैवमपि सिद्धयति यत्र ।
कर्मफलापेक्षाहीनाः
धर्मे निष्ठाः कर्ममुखेन ।। वयं हिन्दु

अस्मासु नास्ति च भेदः
अस्मासु नास्ति च वादः ।
भिन्नमतम् एकीकृत्य
सङ्गच्छेमहि संवदेमहि ।। वयं हिन्दु

मम जननी भारतमाता
पुत्रोऽहं सेवाकर्ता ।
एवमेव कृत्वा भावम्
सत्यं वदाम चराम धर्मम् ।। वयं हिन्दु

श्रीनारायणभट्टः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

7. जयतात् संस्कृतवाणी मधुरा

मोहनरागः आदितालः

जयतात् संस्कृतवाणी मधुरा
भवतात् विश्वजनादरणीया
मञ्जुलभाषिणी,
चारुविलासिनी
कलरवरम्यधुनी ॥ जयतात्

पावनमुनिजनकुञ्जविहारिणी
सुमनोमन्दिरलास्यविधायिनी
अनुपमसुन्दरी ललितकलावनी
वल्मीकभवादिकवीन्द्रखनी
ज्ञानप्रदायिनी,
रसिकविलासिनी
घनविपदुपशमनी ॥ जयतात्

सत्यशान्तिशमदमोपदेशिनी
धर्मकर्मसु धैर्यप्रचोदिनी
नीरसभुवने नवरसपूरिणी
सपदि जनानां तापनिवारिणी
कलिमलहारिणी,
भवजलतारिणी
सरसिजभवरमणी ॥ जयतात्

श्री. गु. गणपय्य होळ्ळ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

8. भारति मामव

गौलरागः आदितालः

प – भारति मामव भगवति भैरवि
भार्गवि शाम्भवि गौलाङ्गसुन्दरि !. । भारति

अ – निरवधिसुखदायिके विद्यानायिके
निरतिशयानन्तफलप्रदायिके । भारति

च – सरसिजमृदुतमसमयुगचरणे
सरसीरुहासने शरदिन्दुवदने
करधृतवरवीणापुस्तकंकमले
सुरुचिरमुक्ताहारसुवलये ।। भारति

श्री. ति. गो. अनन्तसुब्रह्मण्यम्

9. सादरं समीहताम्

सादरं समीहतां वन्दना विधीयतां
श्रद्धया स्वमातृभूः समर्चना विधीयताम् ।।
आपदो भवन्तु वा, विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयतां, वीरता विधीयतां
निर्भयेन चेतसा पदं पुरो निधीयताम् ।। सादरं
प्राणदायिनी इयं, त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयं
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम् ।। सादरं

श्री वासुदेव द्विवेदी शास्त्री

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

10. स जयति जगति सनातनधर्मः

मोहनरागः आदितालः

स जयति जगति सनातनधर्मः
सत्यमिदं सत्यम् ॥
उपदेशः खलु यस्य मनोज्ञः
नित्यनवीनोऽयम् ॥ ॥ सत्यमिदं सत्यम् ॥

निर्मलभक्त्या कर्मविशुद्धं
कुरुताविरतं फलमविचिन्त्य ।
अयमिह धर्मः रक्षत धर्मं
रक्षति धर्मो हि ॥ सत्यमिदं ॥

अर्चत विष्णुं शङ्करमथवा
जिनमाचार्यं बुद्धमथान्यम् ।
एको देवो नाम विभिन्नं
नास्ति विवादोऽत्र ॥ सत्यमिदं ॥

अयमिह स्पृश्यः अयमस्पृश्यः
उच्चो ह्येकः नीचोऽप्यपरः ।
एवं रूपः भिन्नो भावः
कल्पित एवायम् ॥ सत्यमिदं .... ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भूतलमेकं यत्र निवासः
कुलमप्येकं मनुकुलजानाम् ।
तस्मात्सर्वे भ्रातरयूयं
मा विस्मरतेदम् ॥ सत्यमिदं .... ॥

जातिरभिन्ना नीतिरभिन्ना
लक्ष्यमभिन्नं कार्यमभिन्नं
तस्मात्सर्वे सङ्गच्छध्वं
सङ्घे शक्तिरिह ॥ सत्यमिदं ... ॥

द्वेषं त्यक्त्वा भेदं हित्वा
लक्ष्यं सततं चेतसि कृत्वा ।
क्रियते कार्यं यदि युष्माभिः
भविता सिद्धिरिह ॥ सत्यमिदं .... ॥

धर्मे रक्तिः कर्मणि सक्तिः
दैवे भक्तिः पापविरक्तिः ।
सर्वेषामपि भवभयतरणे
एषा युक्तिरिह ॥ सत्यमिदं .... ॥

मनसा सततं ध्यायत भद्रं
वचसा सततं निगदत भद्रम्
कृत्या सततं कुरुत च भद्रं
भवति हि वो भद्रं ॥ सत्यमिदं ॥

श्री मञ्जुनाथशर्मा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

॥. मृदपि च चन्दनम्

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम् ।
यत्र च बाला देविस्वरूपा बालाः सर्वे श्रीरामाः ॥
हरिमन्दिरमिदमखिलशरीरम्
धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः
धेनुर्माता परमशिवा ॥
नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा ॥ मृदपि ॥
भाग्यविधायि निजार्जितकर्म
यत्र श्रमः श्रियमर्जयति ।
त्यागधनानां तपोनिधीनां
गाथां गायति कविवाणी
गङ्गाजलमिव नित्यनिर्मलं
ज्ञानं शंसति यतिवाणी ॥ मृदपि ॥
यत्र हि नैव स्वदेहविमोहः
युद्धरतनां वीरणाम्
यत्र हि कृषकः कार्यरतः सन्
पश्यति जीवनसाफल्यम्
जीवनलक्ष्यं नहि धनपदवी
यत्र च परशिवपदसेवा ॥ मृदपि ॥

श्री जनार्दनः हेरंडे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

12. हिमगिरेः शृङ्गम्

हिमगिरेः शृङ्गम्, देवनदीं गङ्गाम्
मनसि निधाय हि अनुभवामः
अनुपममुत्तुङ्गं भावम्, अनुपममुत्तुङ्गम् ॥
दिव्यसनातनसंस्कृतिः
यतो हि वेदपुराणानि ।
हिन्दो रुन्नत्यवनत्योः
सदृशानि गिरिशिखराणि ।
भीरुमनस्स्वपि धीरस्वभाव
जनयेयुर्हिमभवनानि ॥ हिमगिरेः ॥
तं सुरलोकमतिक्रम्य
अवतीर्णा या भागीरथी ।
भारतमातुः सङ्गेन
पुण्या जाता भाग्यवती ।
हिन्दुदेशे प्रतिजनमनसः
पावनकारिणी पुण्यवती ॥ हिमगिरेः ॥
पराजयोऽपि सोपानं
धैर्यं विजयस्य निदानम् ।
गच्छतु दुःखितबन्धुभ्यो
वक्तुं धैर्यं समाधानम् ।
मातुः गौरवपरिरक्षायै
निष्ठं तनुहृद्धनप्राणम् ॥ हिमगिरेः ॥

श्री नारायणभट्टः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

13. चिरनवीना संस्कृता एषा

चिरनवीना संस्कृता एषा, गीर्वाणभाषा
चिरनवीना संस्कृता एषा ॥
महतो भूतस्य निश्वसितम्
अस्ति यस्याम् अतिपुरातनवेदसाहित्यम्
शास्त्रपूरैः स्मृतिविचारैः
वरकवीनां काव्यसारैः
चित्रिता मञ्जुला मञ्जूषा, मञ्जुला भाषा
॥ चिरनवीना ॥

वाल्मीकि-व्यास-मुनिरचित रामायणं
महाकाव्यं महाभारतं
क्लैब्यकिल्बिषकलितपार्थं
कार्यविषये योजयन्ती
अस्ति यस्यां भगवती गीता भगवता कथिता
॥ चिरनवीना ॥

मातृभाषा मातृभाषाणाम्, भवितुमर्हा
राष्ट्रभाषा भारतीयानाम्
भवतु भाषा द्वेष नाशः, सर्वथा उद्घोषयामः
भारतीया भारती एषा अनुपमा सरसा
॥ चिरनवीना ॥

श्री नारायणभट्टः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

14. भारतधरणीयम् मामकजननीयम्

आभेरीरागः आदितालः

भुवमवतीर्णा नाकस्पर्धिनी
भारतधरणीयम्, मामकजननीयम् ॥

शिरसि हिमालयमुकुटविराजिता
पादे जलधिजलेन परिप्लुता
मध्ये गङ्गापरिसरपूता
भारतधरणीयम्, मामकजननीयम् ॥ भुवमवतीर्णा ॥

काश्मीरेषु च वर्षति तुहिनम्
राजस्थाने प्रदहतिपुलिनम्
मलयस्थाने वाति सुपवनः
भारतधरणीयम्, मामकजननीयम् ॥ भुवमवतीर्णा ॥

नानाभाषिजनाश्रयदात्री
विविधमतानां पोषणकर्त्री
नानातीर्थक्षेत्रसवित्री
भारतधरणीयम्, मामकजननीयम् ॥ भुवमवतीर्णा ॥

पुण्यवतामियमेव हि नाकः
पुण्यजनानां रुद्रपिनाकः
पुण्यपराणामाश्रयलोकः
भारतधरणीयम् मामकजननीयम् ॥ भुवमवतीर्णा ॥

श्री. जि. महाबलेश्वरभट्टः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

15. देववाणीनमनम्

नमो नमोऽम्ब देववाणि देवि कामपूरणि ।
नमो नमोऽम्ब पाहिमां पुनीहि कामरूपिणि ॥

यागधूमपाविते तपोवने निनादिनि !
पावनापगाप्रवाहमञ्जुनादयोगिनि !
योगधूतपाप्मनां मुखेऽमले विलासिनि!
भोगसुन्दरापवर्गदायिनि, सनातनि ! ॥ नमो ॥

चारुशब्दसुन्दरास्यवल्गुलास्यमोहिनि !
व्यास-वाल्मीकि-कालिदास-भास-वासिनि !
भावभव्यवाग्विलासरङ्गमञ्चरूपिणि !
रम्यगीतनुत्त्यनाट्यमेलनेन शोभिनि ! ॥ नमो ॥

तर्कशब्दशास्त्रचित्रवाग्विनोदरञ्जिनि !
ब्रह्मकर्मचिन्तया निगूढतत्त्वदर्शिनि !
वेदलोकशब्दसम्पदूर्जिते मनोन्मनि !
भारतीयसंस्कृतेरुदारसारवाहिनि ! ॥ नमो ॥

श्री हयवदनपुराणिकः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

16. कुरुध्वमद्य सज्जताम्

कुरुध्वमद्य सज्जतां रणाय भोः सशास्त्रताम्
प्रयात राष्ट्रसैनिकाः प्रयात राष्ट्रसैनिकाः ॥

समिद्ध एष सङ्गरः प्रयान्ति सैनिका रणम्
समेत्य कुर्महे वयं रिपूंश्च धूलिसात् क्षणम् ।
संहताश्च सञ्जाताः युध्येमहि युध्येमहि
प्रयातरे, अभियातरे प्रयात राष्ट्रसैनिकाः ॥ कुरुध्वम् ॥

मरुत्सुताः प्रकुर्महे स्वमृष्टिसात् दिवाकरम्
अगस्तिवत्पिबेम छुल्लुकीकृतं च सागरम् ।
बालाह्यभिमन्यवः क्षणाज्जयेम चान्तकम्
प्रयातरे अभियातरे प्रयात राष्ट्रसैनिकाः ॥ कुरुध्वम् ॥

चन्द्रगुप्तमद्य संस्मरेम भीमविक्रमम् ।
धमनिसञ्चितं वितन्महे च शिवपराक्रमम् ।
महापरम्परामिमां च कुर्महे त्वखण्डिताम्
प्रयातरे अभियात रे, प्रयात राष्ट्रसैनिकाः ॥ कुरुध्वम् ॥

अग्निकुण्डमत्र चण्डताण्डवं समन्ततः
निहत्य शक्तिमासुरीं विदध्महे तदाहुतिम् ।
वंश एष विख्यातो मार्ग एष नो महान्
प्रयात रे अभियात रे प्रयात राष्ट्रसैनिकाः ॥ कुरुध्वम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

17. धीवरगानम्

नायकः – आयाहि रे ! आयाहि रे ! आयाहि रे !
विहायसि सराग - रश्मि - चन्द्रमाः
तनोति सान्द्र - रोचि - मञ्जु - चन्द्रिकाः
सिन्धुरावघोषिताः रोदसीकन्दराः
यान्तु यानपात्रचालकाः सधीवराः
॥ आयाहि ॥

अनुयायिनः – याहि रे! याहि रे! याहि रे! याहि रे याहि ॥

नायकः – चन्द्रहासमज्जिता तामसी प्रिया
सर्व - देह कान्ति-पुञ्ज-मञ्जु-वलगना ।
निश्चला विभासते तारलोचना
यान्तु यानपात्रचालकाः सधीवराः
॥ आयाहि ॥

अनुयायिनः – याहि रे! याहि रे! याहिरे! याहि रे! याहि ॥

नायकः – सागरेण चुम्बिता चन्द्रिका मुदा
राजते विलासहासलास्यचित्रिता
रागिणीव भासते रागरञ्जिता
यान्तु यानपात्रचालकाः सधीवराः
॥ आयाहि ॥

अनुयायिनः – याहि रे! याहि रे! याहि रे! याहि रे! । याहि ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

18. संस्कृतेन सम्भाषणं कुरु

संस्कृतेन सम्भाषणं कुरु जीवनस्य परिवर्तनं कुरु
यत्र यत्र गच्छसि पश्य तत्र संस्कृतं
संस्कृतेः संरक्षणं कुरु । ।। सस्कृतेन ।।
जीवनस्य लक्ष्यमस्ति किम् ?
जीवनस्य लक्ष्यमेव संस्कृतस्य वर्धनम् ।
स्फूर्तिरस्ति, तत्र प्रीतिरस्ति
स्फूर्तिरस्ति, प्रीतिरस्ति संस्कृतस्य वर्धने
जिजीविषाम संस्कृताय रक्षयाम संस्कृतिं
समर्पयाम संस्कृताय जीवनम् । ।। संस्कृतेन ।।
जागृयाम, वयं प्रेरयाम
जागृयाम प्रेरयाम सर्वहिन्दुसोदरान् ।
संपिबाम , वयं पाययाम
संपिबाम पाययाम संस्कृतामृतं सदा ।
देशहितचिन्तनं, तेन विना जीवनम्
व्यर्थमेव तस्य गर्ह्यजीवनम् । ।। संस्कृतेन ।।
ऐक्यमस्तु अचलबुद्धिरस्तु
ऐक्यमस्तु अचलतास्तु संस्कृताभिमानिनाम् ।
धीरतास्तु नैव भीतिरस्तु
धीरतास्त्वभीतिरस्तु मास्तु उदासीनता
मातृभूमिसेवनं दीनदलितरक्षणं
संस्कृतप्रचार एव जीवनम् । ।। संस्कृतेन ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

19. विलसतु सा मे रसनाग्रे

विलसतु सा मे रसनाग्रे
निवसतु सा मे हृदयाब्जे ॥
या वै वाणी ध्यानावस्थित मुनिसाक्षात्कृतवेदमयी ।
या च पराशरमुनिमनुमुख्य –
स्मृतिविस्तारितधर्ममयी ॥ विलसतु ॥
या वै वाणी वल्मीकोद्भव –
मुनिकृतरघुवरचरितमयी ।
या वा वेदव्यासमुखोदित –
पञ्चमवेदपुराणमयी ॥ विलसतु ॥
या वै जैमिनि - कपिल - पतञ्जलि –
गौतमादिकृतशास्त्रमयी ।
या वा वेदान्तप्रतिपादित –
मोक्षप्रदायक तत्त्वमयी ॥ विलसतु ॥
या वै वाणी भारवि - वाण -
प्रमुख - कवीश्वर - काव्यमयी ।
या वै रूपकचम्पूमुक्तक –
पुण्यदविविधस्तोत्रमयी ॥ विलसतु ॥
या खलु भारतभूप्रादेशिक –
भाषानिवहप्राणमयी ।
कोट्यनुकोटिषु भाषास्वपि या
केवलमेका देवमयी ॥ विलसतु ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

20. जय भारतजननी

भारतमाता बुधजनगीता
निर्मलगङ्गाजलपूता ।
शिरसि विराजितहिमगिरिमुकुरम्,
चरणे हिन्दुमहोदधिसलिलम् ।
जघने सस्यलतातरुवसनम्
जयभारतजननी ३ ।। भारतमाता ।।

ऋषिवरघोषित मन्त्रपुलकिता
कविकुलगुम्फितपावनचरिता
धीरवीरनृपशौर्यपालिता
जयभारतजननी ३ ।। भारतमाता ।।

मम मनसि सदा तव पदयुगलम्
संस्कृत - संस्कृति - सतत - चिन्तनम्
भावरागलयतालमेलनम्
जय भारतजननी ३ ।। भारतमाता ।।

श्री गु. गणयय्य होळ्ळः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

21. वाणीवन्दनम्

जय नमो विधिरमणि भुवनमोहिनि वाणि ।
अभयदायिनि जननि अव सदा कल्याणि ॥

वन्दामहे नयन-कलित-करुणा-वीचि
मन्देहतिमिरनिर्दलनसूर्यमरीचि ।
च्छन्दोमयि प्रभवसीति मूनिनावोचि
इन्दीवराक्षि तनुगात्रि विष्वद्रीचि ॥ जय ॥

भ्राजत्भे त्वमप्रसि कुशलरवयेप्राची
व्याजाद्विना स्फुरसि कविषु धीनाराची ।
तेजस्विनां सुमतिमयि विधेहि घृताचि
ओजोबलं वितनु सततमस्मद्वाचि ॥ जय ॥

श्रोणीतटे लसति कनकभासुरकाञ्ची
पाणौ ध्वनन्मधुरगीतचारुविपञ्ची ।
एणीदृशां भुवि न कापि तव सध्रीचि
शोणानि मा कुरु पदानि ते तिर्यञ्चि ॥ जय ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

22. प्रवहतात् संस्कृतमन्दाकिनी

शतशतकोटिशरत्पर्यन्तं
प्रवहतात् संस्कृतमन्दाकिनी ।।

सिन्धुसुतुद्रीसरस्वतीनां
तटे ऋषीणां ध्यानपराणाम् ।
होमधूमपावितलोकानाम्
अत्रिभृगूणां छन्दोवाणी ।। प्रवहतात् ।।

वाल्मीकिमुनिव्यासविरचिता
रामकृष्णयोः पावनगाथा ।
अखण्डदीपो भगवद्गीता
कर्मयोगसन्देशदायिनी ।। प्रवहतात् ।।

इयमस्माकं धर्मभारती
राष्ट्रैक्यस्य च महती स्फूर्तिः
विना संस्कृतं नैव संस्कृतिः
इह परत्र कल्याणकारिणी ।। प्रवहतात् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

23. केशवं स्मरामि सदा

हिन्दुराष्ट्रसङ्घटकं सुजनवन्दनीयं
केशवं स्मरामि सदा परमपूजनीयम् ॥

राष्ट्रमिदं हिन्दूनां खलु सनातनम्
विघटनया जात चिरदास्यभाजनम्
दुःखदैन्यपीडितमिति पीडितहृदयम् ॥ केशवं ॥

भगवद्ध्वज एव राष्ट्रगुरुरयं महान्
देशोऽयं खलु देवो जगति महीयान्
बोधयन्तमिति तत्त्वं सततस्मरणीयम् ॥ केशवं ॥

वीरव्रतमेव परं धर्मनिदानम्
सुशीलमेव लोकेऽस्मिन् परमनिधानम्
उपदिशन्तमिति सारं दृढमाचरणीयम् ॥ केशवं ॥

नेतुं निजराष्ट्रमिदं परमवैभवं
नयत विलयमन्तर्गतसकलभेदभावम् ।
सङ्घमन्त्रमिति जपन्तम् एकमेषणीयम् ॥ केशवं ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

24. जय जय भारतदेश

जय जय भारतदेश जयत्वं जय जय भारतदेश !
नत्वा रुद्रं कैलासेश ताण्डव कर्तारं
ध्यात्वा रामं धनुर्धारिणं रावणहन्तारं
स्मृत्वा कृष्णं चक्रधारिणं कंसच्छेत्तारं
प्रणम्य सर्वान् पराक्रमध्वं, घोषयध्वम्, घोषयध्वम्
॥ जय ॥

जयतु हनूमान् लङ्कादग्धा द्रोणाचलधारी
जयतु प्रतापो राणावीरो गिरिकन्दरवासी
जयतु शिवाजी झान्सीलक्ष्मीः देवी रणचण्डी
प्रणम्य सर्वान् पराक्रमध्वं, घोषयध्वम्, घोषयध्वम्
॥ जय ॥

गङ्गायमुनाब्रह्मपुत्रनदगण्डकपावनवारि
कृष्णागोदासिन्धुनर्मदाः तां सरयूं कावेरीं
सह्यसप्तपुटविन्ध्यहिमाचलम् उन्नतशृङ्गसुशोभं
प्रणम्य सर्वान् पराक्रमध्वं, घोषयध्वं, घोषयध्वं
॥ जय ॥

श्री शारदा रामचन्द्र लाले
श्री वेङ्कटेश शास्त्री जोशी

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

25. सुरसरस्वती

जयिनी भव सुरवाणि
स्तवनं तव करवाणि
शरणं त्वा करवाणि
जगति भव त्वं शुभवाणी ॥ जयिनी ॥

श्रुतिसुखनिनदे शिवदे
कविवरविलसितवरदे
सर्वाङ्गे च्युतिविधुरे
नवरसकलिते मधुरे
कामदुघा त्वं ज्ञानसुधा ॥ जयिनी ॥

धरसि सनातन धर्मम्
जनयसि भाषाजालम्
वर्षसि गीतामृतधाराम्
वदसि सदा श्रुतिमखिलाम्
ह्लादयुता त्वं वृद्धिमिता ॥ जयिनी ॥

श्री गणपय्य होळळ.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

26. मम माता देवता

मम माता देवता । मम माता देवता ।।

अतिसरला, मयि मृदुला
गृहकुशला, सा अतुला ।। मम माता ।।

पाययति दुग्धं, भोजयति भक्तं
लालयति नित्यं, तोषयति चित्तम् ।। मम माता ।।

सायंकाले नीराजयति
पाठयति च मां शुभङ्करोति
शुभं कुरु त्वं कल्याणम्
आरोग्यं धनसम्पदः ।
दुष्टबुद्धिविनाशाय
दीपज्योतिर्नमोस्तु ते ।।
पाठयति च मां शुभङ्करोति ।। मम माता ।।

रात्रौ अङ्के मां स्वापयति
मधु मधु मधुरं गीतं गायति
आ • आ आ आ आ आ• ।।मम माता ।।

श्री ल. म. चक्रदेव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

27. देशगीतिका

गुणगणमण्डितयदुवरलसिता
राजति भारतमाता ।
नीतिबोधकपरात्परगीता
बोधकयोगिजनाप्ता ।। गुण ।।

रम्यसुरालयसरिदाक्रीडैः
भव्यसुलालितनिजाङ्गा ।
अभिमतसिद्धा धन्या
शुभफलवृद्धिसुमान्या
जीयाद् भारतशोभा ।। गुण ।।

अनुदिनमङ्गलदायकदयया
भारतमाता जयतात् ।
जयतात् जयतात् जयतात्
निजजनगणमवतात्
भारतमाता जयतात् ।। गुण ।।

श्री सीतारामाचार्यः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

28. भूमिरियं बलिदानस्य

एत बालकाः ! दर्शयामि वस्तेजो हिन्दुस्तानस्य
तेजो भारतवर्षस्य ।
अस्य मृत्तिका शिरसा वन्द्या भूमिरियं बलिदानस्य ।
वन्दे मातरम् । वन्दे मातरम् ।।

उत्तरभागे रक्षणकर्ता नगाधिराजो विख्यातः ।
दक्षिणदेशे पदक्षालको महासागरः प्रख्यातः ।
पश्यत गङ्गायमुनातीरं परं पावनं भूलोके
स्थाने स्थाने यद्दिव्यत्वं नैव सुराणामपि नाके
एकमेव तत् स्थानं चैतत् देवानामवतारस्य ।। अस्य ।।

रजपूतानामेतत् स्थानं खड्गे येषाम् अभिमानः
धर्मरक्षणे युद्धे मरणं यैर्मन्यते सम्मानः ।
अत्रैवासीत् प्रतापवीरो विश्वेऽस्मिन् यो बहुमान्यः
शीलरक्षणे भस्मीभूताः अत्रासङ्ख्याः पद्मिन्यः
रजः सुपूतं वीरपदाब्जैः स्थानं चैतद् देशस्य ।। अस्य ।।

वङ्गोऽयं यद्धरणी हरिता मनोहारिणी सर्वत्र
निजराष्ट्रार्थं सिद्धा मरणे सन्ति बालका अपत्र ।
रामकृष्ण - गौराङ्ग - विवेकानन्द - प्रमुखाः यत्रासन्
अरविन्दाद्याः क्रान्तिकारका. शान्तिपूजकाः यत्रासन् ।
जन्मभूरियं 'नेताजेः' प्रख्यातस्य सुभाषस्य ।। अस्य ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इयं दृश्यतां महाराष्ट्रभूः यत्र शिवाजी राजासीत्
यस्य भवानीकरवालेन म्लेच्छानां संहारोऽभूत् ।
स्थाने स्थाने पर्वतभागे सामर्थ्याग्निः प्रकटोऽभूत्
घोषो 'हरहर महादेव' इति बाले बाले प्राविरभूत् ।
कृतं हि गौरवरक्षणकार्यं शिवेन हिन्दुस्थानस्य ।। अस्य ।।

भक्तिमानयं दक्षिणदेशो गोदाकृष्णापरिपुष्टः
गगनस्पर्धितशिल्पकलान्वितगोपुरभालैर्विभूषितः ।
अत्र विद्यते सुजनस्थानं सीतापतिपदपरिपूतम्
अत्र शङ्कराचार्या वन्द्याः केरलभागे सम्भूताः
विजयनगरसाम्राज्यमिहासीत् ख्यातं हिन्दूधर्मस्य ।। अस्य ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः
इन्द्रं यमं मातरिश्वानमाहुः
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ।

शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति
बुद्धस्तथार्हन्निति बौद्धजैनाः
सच्छ्री अकालेति च सिख्खसन्तः ।

शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ॥

ओं शन्तिः शन्तिः शन्तिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गीतलेखकानां विलासाः

श्री मञ्जुनाथ शर्मा
तर्कशास्त्रोपन्यासकः
चामराजेन्द्रसंस्कृतकलाशाला
पम्पमहाकविमार्गः
बेङ्गलूरु - 18

श्री गु. गणपय्य होळ्ळः
अलङ्कारशास्त्रप्राध्यापकः
नागबीदि-गोकर्णम्
उत्तरकनरा-कर्नाटकम्

श्रीधर भास्कर वर्णेकर
81, अभ्यङ्कर नगर
नागपूर - 10

श्री वेङ्कटरमण मुच्चिनायः
- कावलकट्टे -
ता. बण्ट्वाळ. द क.
कर्नाटकम्

श्री जि. महाबलेश्वर भट्टः
व्याकरणोपन्यासकः
चामराजेन्द्रसंस्कृतकलाशाला
पम्पमहाकविमार्ग
बेङ्गलूरु - 18

श्री जनार्दन हेग्डे
73/2 अक्षरम्, रङ्गाराव्मार्गः
शङ्करपुरम्, बेङ्गलूरु 4

श्री नारायण भट्टः
संस्कृतोपन्यासकः
गोविन्ददासकलाशाला
सुरत्कल् - द. क.
कर्नाटकम् ।

श्री हयवदन पुराणिकः
पूर्णप्रज्ञविद्यापीठम्
पूर्णप्रज्ञनगरम्
बेङ्गलूरु - 29.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शरद रामचन्द्र दाते
381/A-2 सत्सङ्ग
शारदा विद्यामन्दिरसमीपे
शनिवारपेटे - पुणे - 30.

श्री सीताराम आचार्यः
निवृत्त प्राध्यापकः
उडुपि. द. क.

डा. टि. जि. अनन्त सुब्रह्मण्यम्
व्याख्याता
केन्द्रीयसंस्कृत विद्यापीठम्
तिरुपतिः

श्री वासुदेव द्विवेदी शास्त्री
सार्वभौमसंस्कृतप्रचार -
कार्यालयः
वाराणसी

श्री ल. म. चक्रदेवः
श्रीवत्सबालमन्दिरम्
गिरगाँव, मुम्बई - 4

मुद्रितेषु गीतेषु गीतद्वये लेखकनाम न निर्दिष्टम् । तदत्र निर्दिश्यते ।

1. संस्कृतेन सम्भाषणं – श्री वेङ्कटरमण मुच्चिन्नायः
2. विलसत् सा मे – श्री मञ्जुनाथ शर्मा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ABOUT THE PARISHAD

The Parishad started on 7–12–1982.

AIMS

* To demonstrate that Sanskrit is easy to learn and most expressive of all languages.
* To confirm that Sanskrit is for all sections of people.
* To build up Sanskrit atmosphere as a means in conveying Indian thought and culture, and in attaining National Integrity.

ACTIVITIES

* Conducting Sambhashana Sibirams under "Speak Sanskrit in ten days" project.
* Weekly meetings and discourses on modern and Sastraic topics.
* Door to door campaign.
* Staging modern Sanskrit playlets and conducting Kavisammelanams etc.
* Publication of material useful for propogation.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.